# Shri Madanagopala Stotram

# શ્રીમદનગોપાલસ્તોત્રમ્

## Document Information

Text title : Shri Madanagopala Stotram 05 04

File name : madanagopAlastotram2.itx

Category : vishhnu, krishna, stotra

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 05-04

Latest update : October 9, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 9, 2021

*sanskritdocuments.org*

# શ્રીમદનગોપાલસ્તોત્રમ્

ઈશ્વર ઉવાચ-
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ રહસ્યં ભુવનેશ્વરિ ।
તવૈવ પૌરુષં રૂપં ગોપિકાનયનામૃતમ્ ॥ ૧॥

સદા નિષેવિતં રાગાદ્ભવદ્ભિરહભીરુભિઃ ।
સત્યભામાદિરૂપાભિર્માયામૂર્તિભિરષ્ટભિઃ ॥ ૨॥

ખ્યાતં મદનગોપાલસંજ્ઞયા ભુવનત્રયે ।
તસ્ય ધ્યાનં પ્રવક્ષ્યામિ સર્વપાપપ્રણાશનમ્ ॥ ૩॥

સર્વમોહમયં સર્વસમ્પત્પ્રદમનુત્તમમ્ ।
અણિમાદિમહૈશ્વર્યપ્રદમાયુઃપ્રવર્ધનમ્ ॥ ૪॥

સૌભાગ્યદાયકં નૃણાં સ્ત્રીણાં ચૈવ વિશેષતઃ ।
કિમત્ર બહુનોક્તેન ધ્યાનેનાનેન ભામિનિ ।
યદ્યદિચ્છતિ તત્સર્વં નરઃ પ્રાપ્નોત્યસંશયઃ ॥ ૫॥

શ્રીમદ્બાલાર્કસઙ્કાશં પદ્મરાગમણિપ્રભમ્ ।
બન્ધૂકબન્ધુરાલોકસન્ધ્યારાગારુણદ્યુતિમ્ ॥ ૬॥

મકુટાનેકમાણિક્યપ્રભાપલ્લવિતામ્બરમ્ ।
કિરીટોપાન્તવિન્યસ્તબર્હિબર્હાવતંસકમ્ ॥ ૭॥

કસ્તૂરીતિલકાક્રાન્તકમનીયાલકસ્થલમ્ ।
નિસ્તલસ્થૂલમાણિક્યચારુમૌક્તિકમણ્ડલમ્ ॥ ૮॥

દન્તાંશુકુસુમાશ્લિષ્ટચિબુકોદ્દેશશોભિતમ્ ।
શશાઙ્કબિમ્બાલઙ્કારશ્લાઘાતઙ્કકરાનનમ્ ॥ ૯॥

અનર્ઘરત્નગ્રૈવેયવિલસત્કમ્બુકન્ધરમ્ ।
ઉદંશુમૌક્તિકૈર્હારૈર્વૈજયન્ત્યા ચ માલયા ॥ ૧૦॥

શ્રીવત્સકૌસ્તુભાભ્યાં ચ પરિષ્કૃતભુજાન્તરમ્ ।
છત્રં પુષ્પં શરં પદ્મં સૃણિં શઙ્ખેક્ષુકાર્મુકે ॥ ૧૧॥

ગદાં પાશં ચ મુરલીં બિભ્રાણં મોહનાકૃતિમ્ ।
નિમ્નનાભિં રોમરાજીવિલસત્પલ્લવોદરમ્ ॥ ૧૨॥

વિસઙ્કટકટીદેશવાચાલમણિમેખલમ્ ।
સ્પુરત્સૌદામનીછાયાદાયાદકનકામ્બરમ્ ॥ ૧૩॥

મણિમઞ્જીરકિરણકિઞ્જલ્કિતપદામ્બુજમ્ ।
શાણોલ્લીઢમણિશ્રેણિરમ્યાઙ્ઘ્રિનખમણ્ડલમ્ ॥ ૧૪॥

આપાદકણ્ઠમાયુક્તભૂષાશતમનોહરમ્ ।
કલ્પકાનોકહારામમહિતે મણિમણ્ડપે ॥ ૧૫॥

ચિન્તામણિમહાપીઠમધ્યે હેમસરોરુહે ।
કર્ણિકાપરિસન્દીપ્તશ્રીમચ્ચક્રાસને શુભે ॥ ૧૬॥

તિષ્ઠન્તં દેવદેવેશં ત્રિભઙ્ગીલલિતાકૃતિમ્ ।
વામાંસશિખરોપાન્તવ્યાલોલમણિકુણ્ડલમ્ ॥ ૧૭॥

આકુઞ્ચિતભ્રુવં કિઞ્ચિત્કુઞ્ચિતાધરપલ્લવમ્ ।
ગાનામૃતરસાસ્વાદનિષ્પન્દનિખિલેન્દ્રિયૈઃ ॥ ૧૮॥

ઉપાસ્યમાનમાનન્દાત્ સદારૈર્દિવિષદ્વરૈઃ ।
સૌરદુન્દુભિનિર્ઘોષૈર્મુક્તપ્રસવવૃષ્ટિભિઃ ॥ ૧૯॥

ધ્યાયેન્મદનગોપાલં મન્ત્રી શુચિરલઙ્કૃતમ્ ।
(યઃ) પઠેન્મદનગોપાલધ્યાનસ્તોત્રં સમાહિતઃ ।
સર્વાન્ કામાનવાપ્નોતિ દુર્લભાનપ્યયત્નતઃ ॥ ૨૦॥

ઇતિ શ્રીમદનગોપાલસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Madanagopala Stotram*
pdf was typeset on October 9, 2021

Please send corrections to *sanskrit@cheerful.com*